पुराणेष्वपाणिनीयप्रयोगाः

आनन्दस्वरूप गुप्त

[Almost in every Purāṇa there are found a number of non-Pāṇinian uses which generally pertain to hiatus, re-sandhi (or double sandhi), remodelling of the basic forms of some words on the lines of Prākṛta-forms, inflectional and conjugational forms influenced by Prākṛta, and also actual Prākṛta forms found incidentally written by scribes in some of the old manuscripts of the Purāṇas. These non-Pāṇinian uses are often held as *ārṣa prayogas*. But in the present article it is shown that they are mostly due to the exigencies of metre, or to the influence of Prākṛta or to both. For this purpose, the article has divided non-Pāṇinian uses of the Purāṇas into five main heads with several sub-heads. Each head and sub-head is, then, discussed with appropriate illustrations from the printed editions and manuscripts of several important Purāṇas. Editors and scribes have often tried to emend these non-Paṇinian uses. Such emendations have also been illustrated here.

On account of some Prākṛta or Prākṛta-influenced forms met with in the Purāṇas, Pargiter held that the Purāṇas, and specially their genealogical chapters, were originally composed in Prākṛta, and later on sanskritized by the Purāṇic redactors. The present article has also briefly discussed this point. According to the view expressed in this article, there might have been parallel genealogical literature composed in Prākṛta by some Sūtas and Māgadhas attached to royal courts, and the Purānic redactors might have also incorporated a few of these Prākṛta ślokas into the genealogical Sanskrit accounts of the Purāṇas, and hence some stray Prākṛta uses in the Purāṇas. A.S.G.]

अथ पुराणेषु वर्त्तमानानाम् अपाणिनीयप्रयोगाणां विचारः प्रस्तूयते। प्रायः सर्वेष्वेव पुराणेषु बहवोऽपाणिनीयप्रयोगा विद्यन्ते। आर्षास्ते प्रयोगा इति मत्वा तेषां साधुत्वं प्रतिपाद्यते। कामं सन्तु तेषां मध्ये कतिचित् प्रयोगा आर्षा अपि, परन्तु ते सर्वेऽपाणिनीयप्रयोगा आर्षा एवेति मतं तु न समीचीनं प्रतीयते, अनेकेषाम् अपाणिनीयप्रयोगाणां तत्र छन्दोऽनुरोध-प्राकृतभाषाप्रभावाद्य-नेककारणमूलकत्वात्। अपि च, भगवता पाणिनिना 'आर्ष' इति शब्दो वेदे एव नियमित इति तस्य 'सम्बुद्धौ शाकल्यस्येतावनार्षे' (पा० १।१।१६) प्रभृतिभिः सूत्रैर् ज्ञायते। वेदेतरवाङ्मये च तेन 'अनार्ष' इति शब्दोऽत्र प्रयुक्त इति तु स्पष्टमेव। वेदसंहिताः, ब्राह्मणानि, आरण्यकानि, उपनिषदश्चे-त्येतद् वाङ्मयमेव वेदे (छन्दसि) अन्तर्भवति; काशिकादिवृत्तिषु छन्दोविषय-काण्युदाहरणानि च अस्मादेव वैदिकवाङ्मयाद् उद्धृत्य प्रदत्तानि। अतः पुराणेषु प्राप्यमाणा ये एव वैदिका वैदिकव्याकरणानुसारिणो वा प्रयोगास् ते एव तत्र वस्तुतः 'आर्ष' प्रयोगा मन्तव्याः; यथा भागवते 'भस्मनि हुतम्' इत्यस्य स्थाने 'भस्मन् हुतम्' (१।१५।२१), 'प्रतिहर्त्तुम्' इस्यस्य स्थाने 'प्रतिहर्त्तवे' (३।५।४७), तथा 'धीमहि' (१।१।१), 'अभिधीमहि' (८।३।२) इत्यादयः प्रयोगाः।

वेदे 'भिस्' विभक्तौ अकारान्तशब्दानां 'पूर्वेभिः' ····· 'नूतनैः' (ऋ०वे० १।१।२) तथा 'कर्णेभिः' ····· 'अङ्गैः' (ऋ० वे० १।८९।८) इत्यादय उभयथा प्रयोगा एकत्रापि प्राप्यन्ते। अकारान्तप्रातिपदिकानां तृतीया-बहुवचने 'भिस'न्ताः प्रयोगास् तु पाणिनिमतेन छन्दस्येव भवन्ति बहुलं[1], न तु लौकिके संस्कृते। लौकिकसंस्कृते तु केवलं 'कर्पूरैः', 'मानसैः' इत्यादय 'ऐस'न्ताः प्रयोगाः शिष्टाः, प्राकृते च पुनः 'कप्पूरेहि', 'माणसेहि' इत्यादयो 'भिस'न्ता एव प्रयोगा दृश्यन्ते। पुनश्च, वेदे यथा—अकारान्त-नपुंसकलिङ्ग-शब्दस्य प्रथमाद्वितीययोर्बहुवचने 'विश्वान्यद्भुता' (ऋ० वे० १।२५।११), विश्वा भुवनानि' (ऋ० वे० १।१५४।२,४), 'विश्वानि दुरितानि' (ऋ० वे० ५।८२।५) इत्यादय उभयथा प्रयोगाः प्राप्यन्ते, तथा पालिप्राकृतेऽपि 'फला', 'फलानि' इत्यादयो द्विविधाः प्रयोगा विद्यन्ते। पुनः, वेदे असमासे इव

१. पा० ७।१। ९, १०

अनभ्यूर्वे समासेऽपि (अर्थात् उपसर्गपूर्वकाद्धातोरपि) 'क्त्वा' प्रत्ययस्य 'ल्यप्' आदेशः क्वचिन्न भवति, एवं च यथा असमासे 'हुत्वा' (ऋ० वे० १०।१४।८), कृत्वा (१०।९।१) इत्यादयः प्रयोगाः, तथा समासेऽपि 'परिधापयित्वा'[२] 'प्रत्यर्थयित्वा'[३] प्रभृतयः प्रयोगा वेदे वर्तन्ते । एवमेव पालिभाषायामपि 'पचित्वा' 'उप्पतित्वा' इत्यादयः प्रयोगाः प्राप्यन्ते । वेदे च समासे इव असमासेऽपि क्वचित् 'क्त्वा' प्रत्ययस्य 'ल्यप्' आदेशः साधुः, यथा 'निषद्य' (ऋ० वे० १०।१४।५), 'उद्धृत्य'[४] इत्यादयः प्रयोगाः, एवम् 'अर्च्य'[५], 'अज्य'[६] इत्यादयोऽपि प्रयोगा वेदे कल्पसूत्रेषु च उपलभ्यन्ते । प्राकृते तु पुनः 'क्त्वा' स्थाने समासेऽसमासे सर्वत्रैव 'ल्यप्' आदेशो दृश्यते, यथा 'उप्पाडिअ' (संस्कृते—उत्पाट्य), 'उवविसिअ' (सं०—उपविश्य), 'परिहरिअ' (सं०—परिहृत्य), 'भविअ' (सं०—भूत्वा), 'भणिअ' (सं०—भणित्वा), 'जाणिअ' (सं०—ज्ञात्वा), 'णाइअ' (सं०—नीत्वा) इत्यादिषु प्रयोगेषु । एवं स्थिते, यदि पुराणेषु 'येहि' (=येभिः), 'वर्षा' (=वर्षाणि), 'उत्सादयित्वा' (=उत्साद्य), 'प्रवर्तयित्वा' (=प्रवर्त्य), 'गृह्य' (=गृहीत्वा), पूज्य (=पूजयित्वा) प्रभृतयोऽपाणिनीयाः प्रयोगा अपि प्राप्यन्ते[७], तर्हि किमेते प्रयोगा आर्षाः, उत प्राकृतप्रतिरूपाः प्राकृतानुकारिणो वा, छन्दोऽनुरोधजन्या वा—इत्ययं प्रश्नः समाधेयः ।

इदमप्यत्रावधेयं यत् पुराणानि खलु परमर्षिणा व्यासेन लोकहितार्थाय संकलितानि रचितानि वा । अतो वर्णजातिलिङ्गादिभेदमनपेक्ष्य सर्वेषामेव जनानां पुराणानां पठने श्रवणे चाधिकारोऽभ्युपगम्यते । अतएव पुराणवाचकाः सूता व्यासाश्च जनसंसदि पुराणानि वाचयन्ति स्म । जनसामान्यस्य च भाषा सदैव

---

२. 'कृष्णं वासो यजमानं परिधापयित्वा' (पा० ७।१।३८, काशि०)

३. 'प्रत्यञ्चमर्कं प्रत्यर्थयित्वा' (तत्रैव)

४. 'उद्धृत्य जुहोति' (तत्रैव)

५. 'अर्च्यं तान् देवान् गतः (तत्रैव)

७. कल्पसूत्रेषु चापि 'आज्येनाक्षिणी अज्य' इति । (पा० ७।१।३८, सि० कौ०, सुबोधिनीव्याख्या)

७ उदाहरणानि तूपरिष्टान्निवेदयिष्यन्ते ।

८. 'इह लोकहितार्थाय संक्षिप्तं परमर्षिणा' (मत्स्य०, ५३।५६ पू)

प्रायेण प्राकृतम् आसीत्। वेदेऽपि 'तितउ'[९] प्रभृतयः प्राकृतप्रतिरूपाः शब्दा उपलभ्यन्ते। भगवता पाणिनिना स्वसूत्रेषु 'भाषायाम्' इति शब्दप्रयोगस्तु शिष्टविशेषाणां भाषां संस्कृतमधिकृत्यैव कृतः, न तु जनसामान्यस्य भाषामधिकृत्य। लोकहितार्थं लौकिकसंस्कृते उपनिबद्धं सूतव्यासादिपरम्परया च लोके प्रचार्यमाणं पुराणवाङ्मयं लोकभाषया प्राकृतेन प्रभावितमभूदिति सम्भावना तु नापलाप्या। पुनश्च, पुराणानि खलु काले काले प्रतिभासम्पन्नैः सूतैर् व्यासैर् अन्यैर् वा पुराणविज्ञैः कविभिः परिवर्द्धितानि संक्षिप्तानि विपरिवर्त्तितानि वा—इति प्राचीन-पुराणकोशानां सम्यग् अध्ययनेन स्पष्टं प्रतीयते। तस्माद् रचनाकाले प्रति-संस्करणकाले वा पौराणिकी भाषा प्राकृतप्रभावेण अस्पृष्टा नासीदित्यपि निश्चित-प्रायमेव। प्राचीन-पुराणपुस्तकानां कैश्चन प्राकृतज्ञैर् लेखकैरपि पुराणानां कानिचित् संस्कृतपदानि ज्ञानतोऽज्ञानतो वा प्राकृतप्रतिरूपकाणि कृतानि, परवर्त्ति-भिश्च लिपिकारैस् तानि तथैव प्रतिलिपीकृतानि च। पुनश्च, पुराणेषूपलभ्यमानानां राजवंशावलीनां केचिद् अंशाः सूतमागधादिभिर् मूलतः प्राकृते एव रचिताः स्युः, पश्चाच्च तेऽशाः पुराणप्रतिसंस्कर्तृभिः संस्कृते परिवर्त्य पुराणेषु संयोजिताः स्युः इत्यपि संभावना वर्त्तते।[१०] अत एव पुराणेषु क्वचिद् द्वितीयास्थाने प्रथमा विभक्तिः प्रयुक्ता दृश्यते,[११] परन्तु संस्कृतवाक्यरचनायाम् एतादृशः प्रयोगोऽसाधु-रेव, प्राकृते तु प्रथमाद्वितीययोः प्रायेण समानरूपत्वात् साधुरेव तत्रेदृशः प्रयोगः। पुराणेषु केषुचित् श्लोकेषु छन्दोभङ्गदोषोऽप्यपाणिनीयप्रयोगेण सह प्राप्यते, परन्तु यदि ते श्लोकाः पुनः प्राकृते परिवर्त्येरन्, तर्हि तत्र छन्दोदोषस्या-भावो जायते, असाधुप्रयोगश्च साधुः सम्पद्यते।[१२] तस्मात् स्पष्टमेतत् यत्

---

९. द्रष्टव्यम्—ऋ० वे० १०।७१।२. उणादिसूत्रेषु यद्यपि 'तितउ' शब्दस्य √तन्+डउ—इति व्युत्पत्तिः कल्पिता, तथापि मूलतोऽयं शब्दः प्राकृतप्रतिरूपक एव।

१०. अपि च द्रष्टव्यम् - पार्जिटर, पुराण-टैक्स्ट आफ दि डाइनैस्टीज आफ दि कलि-एज', परिशिष्ट १। 'निखिलान्येव राजवंशावलीप्रकरणानि मूलतः प्राकृते एव रचितानि पश्चाच्च तानि संस्कृते विपरिवर्तितानि—इति पार्जिटरमहोदयोऽत्र मन्यते। पुराणेषूपलभ्य-मानानां राजवंशावलीनां केचिदेवांशा मूलतः प्राकृते रचिता आसन्, ते च पश्चात् संस्कृते परिवर्त्य पूर्वरचितैः शेषैः संस्कृतांशैः सह पुराणेषु संयोजिताः—इति मतं तु लेखेऽस्मिन् प्रतिपाद्यते।

११, १२. उदाहरणानि ग्रन्थे द्रष्टव्यानि।

पुराणेषु प्राकृतमूलात्मकस्य अंशस्य प्राकृतच्छायारूपे संस्कृते विपरिवर्त्तनादपि केषुचित् स्थलेषु छन्दोभङ्गदोषो विद्यते।[13]

निष्कर्षस्तु—पुराणेषु केचिद् अपाणिनीयप्रयोगाः प्राकृतप्रभाविताः प्राकृतच्छायारूपा वा, अन्ये च छन्दोऽनुरोधाद् अपाणिनीयाः संजाताः। तत्र क्वचिद् आर्षा अपि प्रयोगा वर्तन्ते, परन्तु ते विरला एव। पुराणेष्वपाणिनीयप्रयोगाणां सद्भावे तु बहुत्र छन्दोभङ्गप्रसङ्गपरिहार एव मुख्यो हेतुर् इति नूपरिष्टात् स्पष्टीक्रियते।

एतादृशान् प्राकृतच्छायारूपान् काँश्चिद् अपाणिनीयप्रयोगान् दृष्ट्वैव प्रसिद्धपुराणविदुषः पार्जिटरमहोदयस्य मतं संजातं यद् मत्स्यवायुब्रह्माण्डादीनि पुराणानि मूलतः प्राकृतभाषायामेव रचितान्यासन्, पश्चाच्च तानि प्राकृतच्छायारूपे संस्कृते परिवर्तितानि। भारतीयवाङ्मयमन्तरा पार्जिटरस्य क्षत्रियपरम्पराविषयकः सिद्धान्त एवास्य मतस्याधारोऽस्ति। भारतीयवाङ्मये द्वे परम्परे आस्ताम्—ब्राह्मणपरम्परा, क्षत्रियपरम्परा च; ब्राह्मणपरम्परायां वेदब्राह्मणारण्यकप्रभृतयो ग्रन्थाः संस्कृते एव रचिता आसन्, क्षत्रियपरम्परायाः (सूतपरम्परायाः) पुराणादयो ग्रन्थास्तु प्राकृते रचिताः, पश्चाच्च ते ब्राह्मणजातीयैः प्रतिसंस्कर्तृभिः संस्कृते विपरिवर्तिताः—इति पार्जिटरमहोदयस्य सिद्धान्तः।[14] पार्जिटरमहोदयस्य मतद्वयं कीथोपाह्वेन आङ्गलविदुषा[15] 'जैकौबि' नाम्ना जर्मनविदुषा[16] च निराकृतम्, तथा च पुसाल्करमहोदयेनापि मतस्यास्य निराकरणं क्रियते।[16] तस्मात् पार्जिटरमतं तु विवादास्पदमेव तिष्ठति। अस्तु। प्रकृतमधुनाऽनुसरामः।

---

१३. प्राकृतश्लोकस्य संस्कृते विपरिवर्त्तनम्, अथवा प्राकृतच्छायारूपश्लोकस्य निर्माणं प्रायेण छन्दोभङ्गस्य कारणं भवति। अतएव राजशेखरकृतबालभारतस्य (निर्णयसागरप्रेस-संस्करण, १९२७) द्वितीयाङ्कस्य तृतीयश्लोकस्य टिप्पण्यां 'प्राकृतच्छायारूपोऽयं श्लोकः, अतएवच्छन्दोभङ्गः' इति निर्दिष्टम्।

१४. पार्जिटर, 'एन्शियेन्ट इंडियन हिस्टारिकल ट्रेडिशन' पृ० ५-१८।

१५. द्र०—'जरनल आफ रायल एशियाटिक सोसाइटी' १९१८, पृ० १०२८-३०।

१६. द्र०—पुसाल्कर, 'स्टडीज् इन दि एपिक्स एंड दि पुराणज', पृ० ८६-३०।

पुराणेषु प्राप्ता अपाणिनीयप्रयोगा अधोनिर्दिष्टेषु विभागेषु विभज्य विचार्यन्ते—

१. स्वरसंधिसम्बधिनोऽपाणिनीयप्रयोगाः

(अ) विवृत्तिः (hiatus)

(आ) द्विःसंधिः (double sandhi)

२. प्रातिपदिकसम्बन्धिनोऽपाणिनीयप्रयोगाः

३. सुबन्तपदसम्बन्धिनोऽपाणिनीयप्रयोगाः

(अ) कारकविभक्तिसम्बन्धिनोऽपाणिनीयप्रयोगाः

(१) सम्प्रदाने सप्तमी

(२) 'नमः' योगे सप्तमी

(३) प्राकृतप्रतिरूपकाणि विभक्तिरूपाणि

(आ) लिङ्गव्यत्ययः ।

४. तिङन्तपदसम्बन्धिनोऽपाणिनीयप्रयोगाः

(अ) लङि 'अट्', 'आट्' आगमयोरभावः

(आ) आत्मनेपदस्य स्थाने परस्मैपदप्रयोगः

(१) कर्तृवाच्ये, (२) कर्मवाच्ये

५. 'क्त्वा'ऽन्तसम्बन्धिनोऽपाणिनीयप्रयोगाः

(अ) समासेऽपि 'क्त्वा' प्रत्ययस्य 'ल्यप्'-आदेशाभावः

(आ) असमासेऽपि 'क्त्वा' प्रत्ययस्य ल्यप्

पुराणानां मुद्रितपुस्तकेषु बहवो अपाणिनीयप्रयोगाः सम्पादकैः संशोधिताः—इति प्रतीयते। परन्तु प्राचीनकोशेषु प्रायेण मौलिका एव ते प्रयोगाः प्राप्यन्ते। क्वचित्तु तेष्वपि लिपिकारैः केचिद् अपाणिनीयप्रयोगाः स्वबुद्ध्यनुसारेण संशोधिताः। अतो येषु हस्तलेखेषु ईदृशाः संशोधिताः प्रयोगाः प्राप्यन्ते, ते प्रायशो अर्वाचीनतरा एव मन्तव्याः, तस्माद् ईदृशानां कोशानां तान् प्रयोगान् अन्तरा प्रामाण्यं नाभ्युपेयम्।

अत्र केषाञ्चित् पुराणानां मुद्रितपुस्तकेभ्यः[17], तथा मत्स्यपुराणस्य प्राचीनकोशेभ्यश्च[18] संगृह्य पूर्वोक्तविभागेषु विभक्तानाम् अपाणिनीयप्रयोगाणां कतिचिद् उदाहरणानि स्थालीपुलाकन्यायेन प्रदर्श्यन्ते ।

१. संधिसम्बन्धिनो अपाणिनीयप्रयोगाः

(अ) विवृत्तिः (biatus)

[संस्कृतभाषायां केवलं प्रगृह्याणां प्रकृतिभावस्थले, तथा 'लोपः शाकल्यस्य' (पा० ८।३।१९) इति सूत्रानुसारेण अवर्णपूर्वयोः पदान्तयकारवकारयोर् लोपे कृते च पूर्वपरयोर् अव्यवहितयोर् द्वयोः स्वरयोर् युगपत् प्रयोगः पाणिनि-सम्मतः । पुराणेषु तु पुनर् अन्यत्रापि द्वयोर् अव्यवहितयोः स्वरयोः प्रयोगेन विवृत्तिर् वर्त्तते सा च विवृत्तिः केषुचित् स्थलेषु लिपिकरैः सम्पादकैर् वा 'इति', 'च', 'तु' 'हि' प्रभृतिनिपातानां प्रयोगेन पाठभेदेन वा संशोधिताऽपि दृश्यते । एतत्तु सर्वमग्रे उदाहरणैः स्पष्टीक्रियते ।]

उदाहरणानि

(१) दातव्यं याचमानस्य इति मे व्रतमास्थितम् । (मत्स्य०-कोशेषु)

„ ०स्य हीति „ „ । (मत्स्य०, २१।३२ पू)

(२) विद्युन्माली इवाम्बुदः । (N_1 कोशे)

०लीव चाम्बुदः । (D_8, D_9)

०ली त्विवाम्बुदः । (मत्स्य०, १३०।८ उ)

(३) पूर्ववद् गुरुऋत्विग्भ्यः ··· (मत्स्य०, ९०।६ उ; कोशेष्वपि)

---

१७. अस्मिन् लेखे आकरनिर्देशार्थं मत्स्य०-नारद०-ब्रह्म०-भविष्य०-ब्रह्मवैवर्त०-आनन्दाश्रमस्य, विष्णुभागवतयोर् गीताप्रेसस्य, अन्येषां च पुराणानां वेंकटेश्वरप्रभृतयः संस्करणानि प्रयुक्तानि ।

१८. मत्स्यपुराणस्य त्रिंशत् कोशाः काशिराजन्यास-पुराणविभागे संवादिताः (collated), येषां परिचयो मया 'पुराणम्' पत्रिकायाः प्रथमभागस्य १०१-१११ पृष्ठेषु प्रदत्तः । अस्मिन् लेखे प्रयुक्तानां मत्स्यपुराणकोश-संकेतानां च स्पष्टीकरणं तत्रैव वर्त्तते ।

[अत्र समासे नित्यसंधेरपि परिहारेण विवृत्तिः केवलं छन्दोऽनुरोधादेव । संधौ कृते तु, अनुष्टुप्पादेऽस्मिन् सप्ताक्षराण्येव स्युः ।]

(४) मूत्रं कृत्वोपस्पृशन्ति अकृत्वा पादधावनम् । (मत्स्य०-कोशेषु)
,, ,, ०न्ति चाकृत्वा ,, । (मत्स्य०, १३१।४४ पू)

(५) आसूर्यं च अशामहे । (D_{3-7})
०र्यं तदशामहे । ($D_{10, 11}$)
०र्यं तदशीमहि । (मत्स्य०, २०४।७ उ)

(६) सांख्ययोगौ उभावपि (D_{12})
सांख्ययोगावुभावपि ($D_{1, 2, 10, 13, 14}$)
सांख्ययोगौ भवाभवौ (मत्स्य०, २४८।१७ उ)

(७) नारा इत्युच्यते आपो ऋषिभिस् ··· । (N_1, $D_{3-6, 12}$)
,, ,, ०ते ह्यापो ब्रूषिभिस् ··· (मत्स्य०, २४८।४२ उ)

[यद्यपि 'आपो ऋषिभिस्' अत्र ऋवर्णे रेफध्वनिं मत्वा कोशेषु तथैव संधिः कृतः, अन्यथा 'आप ऋषिभिस्' इति संधिः कर्तव्य आसीत्, अतएव कोशेषु विवृत्तिरत्र न मन्यते । परन्तु मत्स्यपुराणस्य आनन्दाश्रमसम्पादकैरत्रापि विवृत्तिं मत्वा 'हि' निपातस्य प्रयोगेण सा निवारिता ।]

(८) पुरतो यदुसिंहस्य अमोघस्य । (वामन०, केषुचित् कोशेषु)
,, ०स्य ह्यमोघस्य । (वामन०, ९५।४८ उ)

(९) कुण्डिनं न प्रवेक्ष्यामि अहत्वा ··· । (ब्रह्म०, १९९।९ पू)

(१०) पुष्करे तु अनं दृष्ट्वा ··· । (पद्म०, ५।२९।२४१ उ)

अत्र प्रदत्तैरुदाहरणैः स्पष्टमेतद् यत् छन्दोदोषपरिहारायैव विवृत्तिरत्र समाश्रिता आसीत् । सा च केषुचित् कोशेषु मुद्रितपुस्तकेषु च निपातप्रयोगादिना संशोधिता वर्तते ।

यत्र पूर्वनिर्दिष्ट(पा० ८।३।१९)-सूत्रानुसारेण विवृत्तिः पाणिनिसम्मताऽपि वर्तते स्म, तत्रापि विवृत्तिम् असहमानैर्लिपिकारैः सम्पादकैर्वा निपातानां प्रयोगः कृतः, पाठभेदो वा समाश्रितः ; यथा—

अनामया अशोकाश्च ..... । (S_1-शारदाकोशे)

०या ह्यशोकाश्च ..... । (मत्स्य०, ११४।६५ पु, कोशेषु च)

शक्रविष्णू ह्वापरौ । (मत्स्य०, ३२।९ उ)

विष्णुशक्राविवापरौ । (D_{10} कोशे)

(आ) द्विः संधिः (Double Sandhi)

[भगवतः पाणिनेर् मते ८।३।१९ प्रभृतिभिः सूत्रैर् अवर्णपूर्वयोः पदान्तयकार-वकारयोर्लोपे कृतेऽपि ८।२।१ सूत्रानुसारेण तत्र लोपस्यासिद्धत्वात् पूर्वपरयोः स्वरयोः पुनः संधिर् न भवति । परन्तु पुराणेषु तादृशेष्वपि केषुचिन् स्थलेषु पुनः संधिर् (द्विः संधिर्) दृश्यते । द्विःसंधिश्चायं प्रायेण छन्दोदोषपरिहारार्थमेवाश्रितः । अत्रापि क्वचित् लिपिकारैः सम्पादकैश्च निपातप्रयोगादिना द्विः संधिः संशोधितः ।]

उदाहरणानि

(१) सर्वानन्तफलाः प्रोक्ताः (मत्स्य०, ९४।४, कोशेषु च)

[सर्वानन्तफलाः, <सर्वा अनन्त०, <सर्वाः (०स् > ०र्) अनन्त० । अत्रानुष्टुप्पादे नवाक्षरप्रसङ्गपरिहारार्थं द्विः संधिः]

(२) तस्याग्रतो नृपः स्नायात् (अग्नि०, १८५।१३ उ)

[तस्याग्रतः, <तस्या (=देव्याः) अग्रतः, <तस्याः (०स् > ०र्) अग्रतः]

(३) विरेमुरेवं च सुराभिधाय । (मत्स्य०, १५९।१८)

[सुराभिधाय, <सुरा अभिधाय, <सुराः (०स् > ०र्) अभिधाय]

(४) सुतश्च राजा स पुरूरवाभूत् । (वामन०, ७१।५४ उ)

[पुरूरवाभूत्, <पुरूरवा अभूत्, <पुरूरवाः (०स् > ०र्) अभूत्]

(५) हृष्टोत्तीर्य रथात्सद्यः । (ब्रह्माण्ड०, २।३१।२८ उ)

[हृष्टोत्तीर्य, <हृष्ट उत्तीर्य, <हृष्टः (हृष्टय्) उत्तीर्य]

(६) कपालिनैकवीराय । (७ कोशेषु)

कपालिने च वीराय । (मत्स्य०, ४७।१३७ उ)

[कपालिनैकवीराय, <कपालिन एकवीराय, <कपालिने एकवीराय]

(७) तथाऽर्यम्णेति नैर्ऋते (७ कोशेषु)

,, ०म्णे च नैर्ऋते (मत्स्य०, ७९।९ उ)

[अर्यम्णेति, <अर्यम्ण इति, <अर्यम्णे इति]

२. प्रातिपदिकसम्बन्धिनोऽपाणिनीयप्रयोगाः

[पुराणेषु प्राकृतप्रभावेण छन्दोऽनुरोधेन च क्वचित् 'तेजस्', 'यशस्', 'शिरस्', 'श्रेयस्', 'सरस्' प्रभृतीनाम् 'अस्'-अन्तशब्दानां सकारलोपं कृत्वा तेषाम् अकारान्तत्वं (स्त्रियाम्—आकारान्तत्वं) कृतम् । एवम्, अन्येऽपि प्राकृतप्रभाविताः प्रातिपदिकसम्बन्धिनो अपाणिनीयविकाराः पुराणेषु दृश्यन्ते ।]

उदाहरणानि—

(१) अष्टतेजाः स्त्रियो जाताः (मत्स्य०, १८८।१०)

[अत्र 'अस्'-अन्तस्य 'अष्टतेजस्' इति शब्दस्य स्त्रियां 'अष्टतेजा' इत्याकारान्तत्वं कृत्वा तस्य जसि रूपं प्रयुक्तम् । 'अष्टतेजसः' इति शुद्धपाठस्य स्थाने 'अष्टतेजाः' इत्यपाणिनीयेन पाठेन अत्र नवाक्षरप्रसङ्गपरिहारोऽपि कृतः । प्राकृतप्रभावस्त्वत्र स्पष्ट एव ।]

(२) नलवंशप्रसूतास्ते वीर्यवन्तो महायशाः । (वायुपु०, ९९।···)

[अत्र 'महायशाः इति प्राकृतप्रतिरूपकः पाठः वायुपुराणस्य इंडिया आफिसपुस्तकालयस्थे E 3589संख्यके कोशे वर्तते । अस्य कोशस्य

लेखनकालः १४८३ ई० ।[१९] प्राकृतप्रभावोऽप्यत्र वर्तते, छन्दोदोषपरिहारार्थ-मप्येष पाठः समाश्रितः]

(३) मासि मार्गशिरे नरैः (वामन०, ६५।४७, तत्कोशेषु च ।

[अत्र 'मार्गशिरसि' इति शुद्धपाठस्य स्थाने 'मार्गशिरे' इति प्रयोगस्तु नवाक्षरप्रसङ्गपरिहाराय प्रतीयते । कोशद्वये 'मार्गशीर्षे नरोत्तमैः' इति पाठो वर्तते ।)

(४) जगतः श्रेयकारणम् (वामन०, ८८।१)

[अत्र 'श्रेयःकारणम्' इति शुद्धपाठस्य स्थाने 'श्रेयकारणम्' इति पाठस्तु अनुष्टुप्-पादे पञ्चमवर्णस्य लघुत्वकरणार्थम् ।]

(५) तथैव सरमाहात्म्यं ब्रूहि (वामन०, ४३।२)

(६) पप्रच्छ सरमाहात्म्यं (८३।५)

(७) ब्रूहि मे सरमाहात्म्यं (४३।६)

[अत्र त्रिष्वपि स्थलेषु 'सरो०' इति शुद्धपाठस्य स्थाने 'सर०' इति प्रयोगोऽत्र अनुष्टुभि पञ्चमवर्णस्य लघुत्वकरणार्थम् । यत्र तादृश्यपेक्षा न वर्तते तत्र 'सरस्-' ('महत्सरस्तेन पूर्णः' वामन०, ४३।३८), 'सरो-' ('प्रमाणं सरसो ब्रूहि' २२।४८), 'सरो-' (रुद्रेण च सरोमध्यं प्रविष्टेन-' ३२।५८) प्रभृतयः प्रयोगा एव दृश्यन्ते ।]

(८) दुहितां प्रशशंस च (मत्स्य०, १५४।२६, कोशेषु च ।

[अत्र 'दुहितरं इति पाठस्य स्थाने 'दुहिता' इति पाठो नवाक्षरप्रसङ्ग-परिहाराय । अस्मिन् स्थले शारदालिपिकोशे 'प्रशशंस दुहितरम्' इति संशोधितः पाठो विद्यते । अन्यत्रापि च मात्स्ये तत्कोशेषु च 'यथाच दुहितुर्मम' इति पाठ एव वर्तते ।]

(९) विभ्रान्ताय महान्ताय (मत्स्य०, ४७।१५१ ; तत्कोशेषु च)

---

१९. द्र०—पार्जिटर, पु० टै०, पृ० ५१, टि० २५ ।

[अत्र 'विभ्रान्ताय' इत्यस्य पदस्य सन्निधौ तद्ध्वनिसाम्यार्थं 'महते' इत्यस्य स्थाने 'महान्ताय' इति पाठो धृतः। अनेन पाठेन चात्र छन्दः-पादपूर्त्तिरपि भवति; अन्यथा 'महते' इति पाठेन सप्ताक्षराण्येव स्युः। पुनश्च 'महान्ताय' इति पाठे पालिप्राकृतप्रभावोऽपि दृश्यते, पालिप्राकृते 'महत्' इत्यस्य 'महन्त' इति प्रातिपादिकरूपो भवति।]

(१०) स्वाहाय च स्वधाय च (मत्स्य०, ४७।१५७ पू)

[अत्र शिवस्तोत्रे 'स्वाहा' 'स्वधा' इत्यव्ययशब्दयोर् अकारान्तत्वं कृत्वा तयोश्चतुर्थ्यन्ते पदे शिवस्य विशेषणत्वेनाभिधानत्वेन वा प्रयुक्ते स्तः; अग्रे तृतीये पादे 'वषट्कारात्मने चैव' इति पदस्य वर्त्तमानत्वात्। 'स्वाहा' 'स्वधा', 'वषट्' इति त्रीण्यपि पदानि स्वरादिगणे पठितानि।

३. सुबन्तसम्बन्धिनोऽपाणिनीयप्रयोगाः

(अ) कारकविभक्तिसम्बन्धिनः

[पुराणेषु कचित् सम्प्रदानेऽपि चतुर्थीस्थाने सप्तमी विभक्तिः प्रयुक्ता दृश्यते, कचिच्च 'नमः'-शब्दयोगेऽपि चतुर्थीस्थाने सप्तमी दृश्यते, कचित्तु प्राकृतप्रभावाद्धेतोर् द्वितीयायामपि प्रथमावद् प्रयोगा विद्यन्ते। अन्योऽपि विभक्तिव्यत्ययः पुराणेषु यत्र तत्र प्राप्यते।]

(१) सम्प्रदाने सप्तमी—

मसूरान्नं कुजे दद्यात् (D_{12-14})

मसूरांश्च कुजे दद्यात् (D_{8-6})

अस्य स्थाने—

गुडौदनं च भौमाय (N_1—नेवारीकोशे)

अङ्गारकाय संयावं (मत्स्य०, ९३।१९, केषुचित् तत्कोशेषु च)

(२) 'नमः' योगे सप्तमी—

प्रणवे ऋग्यजुः साम्ने ··· तुभ्यं मन्त्रात्मने नमः।

(मत्स्य०, ४७।१५८)

[अत्र '०साह्ने', '०त्मने' इत्युभयत्र चतुर्थीविभक्तौ एकारान्तत्वात् तद्ध्वनिसाम्याय 'प्रणवे' इत्यत्रापि सप्तमीविभक्तेर् एकारान्तं रूपं समाश्रितमिति संभावना वर्तते । तथा सति विभक्तिव्यत्ययोऽत्र उपेक्षितः । अनेन छन्दो-भङ्गोऽप्यत्र परिहृतो भवति ।]

(३) प्राकृतप्रतिरूपकाणि विभक्तिरूपाणि*

"मागधानां महावीर्यो विश्वस्फाणिर्भविष्यति ।
उत्साद्य पार्थिवान् सर्वान् सोऽन्यान् वर्णान् करिष्यति ॥
कैवर्त्तान् पञ्चकांश्चैव पुलिन्दान् ब्राह्मणांस्तथा ।
स्थापयिष्यति राजानो नानादेशेषु ते जनाः ।
विश्वस्फाणिर्महासत्त्वो युद्धे विष्णुसमो बली"[२०]

(वायु०, ९९।३७७-३७८)

[विश्वस्फाणिर् नानादेशेषु ते जना (= तान् जनान्, कैवर्त्तादीन्) राजानो (= राज्ञः, द्वितीयाबहुवचनम्) स्थापयिष्यति–इत्यन्वयः । अत्र यद्यपि ब्रह्माण्डे (३।७४।१९२) 'स्थापयिष्यन्ति' इति बहुवचनपाठो विद्यते, तथा वायुपुराणस्य वेंकटेश्वरसंस्करणेऽपि (उत्तरा०, अ० ३७, श्लो० ३७३ पू०) 'स्थापयिष्यन्ति राजानो नानादेशेषु तेजसा' इति पाठः परिवर्त्तितः, तथाप्यत्र प्रकरणे 'स्थापयिष्यति' इत्येकवचनमेव साधु, 'विश्वस्फाणिः' इति कर्त्रा तस्यान्वयात् । पुनश्च, विष्णुपुराणे (४।२४।६१-६३ ; जी० वि० संस्करणं ४।२४।१७, १८) तथा भागवतपुराणे (१२।१।३६, ३७) अत्र प्रकरणे 'स्थापयिष्यति' इत्येकवचनपाठ एव वर्तते । अतः, ब्रह्माण्डपुराणे वायुपुराणस्य वेंकटेश्वरसंस्करणे च बहुवचनपाठो भ्रममूलकत्वात् प्रामादिक एव, तत्र 'राजानो' इत्यनेन तस्य मिथ्यान्वयात् । वस्तुतस्तु, 'राजानो', 'ते', 'जना' इति त्रीण्यपि पदानि प्राकृतद्वितीयाबहुवचनरूपाण्येव, प्राकृते प्रायेण प्रथमा-

* अस्य अंशस्याधारः प्रधानतः पार्जिटरकृतः 'पुराण टैक्स्ट आफ दि डाइनेस्टीज आफ दि कलि-एज' नामको ग्रन्थः, विशेषतस्तु तस्य परिशिष्ट (१) भागः ।

२०. द्र०—पार्जिटर, 'पु० टै०', पृ० ५२ । प्राचीनकोशानाम् आधारेण पार्जिटरमहोदयैः स्वीकृतोऽयं पाठः ।

द्वितीययोः समानरूपत्वात्। पुराणेषु च संस्कृतेऽपि प्राकृतप्रतिरूपकाणि त्रीण्यपीमानि पदानि तथैव प्रयुक्तानि। अतोऽत्र संस्कृतविभक्तिषु प्राकृतप्रभावः स्पष्टः। परवर्तिभिश्च लेखकैरिमं प्राकृतप्रभावमविज्ञायैव नाना पाठभेदा अत्रोद्भाविताः।[21]]

अथ मगधराजानो भवितारो वदामि ते। (भागवत०, ९।२२।४५ उ)

[अत्र तु स्पष्टमेव पालिप्राकृतस्य प्रभावो लक्ष्यते। पालिप्राकृते द्वितीयायां बहुवचने 'राजन्' शब्दस्य 'राजानो', 'भवितृ' शब्दस्य च 'भवितारो' इति रूपं भवति। एतादृशः प्रयोगस् तत्रैव साधुः। संस्कृते त्वीदृशो वाक्यविन्यासः सर्वथैवापाणिनीयः]

राजा घोषस्ततश्चापि वर्षाणि भविता त्रयः। (ब्रह्माण्ड०, ३।७४।१५३ उ)

[अत्र प्रकरणे वायुपुराणेऽपि (९९।३४०) 'वर्षाणि भविता त्रयः' इत्येव पाठो वर्तते। 'त्रि' संस्कृतशब्दस्य प्राकृते प्रथमाद्वितीययोस्त्रिषु लिङ्गेषु 'तओ' इति बहुवचनरूपं भवति। अत्र 'त्रयः' इति रूपं 'तओ' इति प्राकृतरूपस्य प्राकृतप्रतिरूपिका संस्कृतच्छायैव। अन्यथा 'वर्षाणि' इत्यस्य योगे 'त्रीणि' इत्येव शुद्धसंस्कृतपाठः स्यात्। वायुपुराणस्यैके कोशे (Jones Ms; W6b, T. 38) अयं पाठ एवं संशोधितः—'त्रीणि वर्षाणि भविता राजा घोषवसुर्नृपः'।[22]]

मृगेन्द्रः स्वातिकर्णस्तु भविष्यति समास्त्रयः। (मत्स्य०, २७३।७ पू)

[अत्रापि 'त्रयः' शब्दः 'तओ' इति प्राकृतरूपस्य प्राकृतप्रतिरूपा संस्कृतच्छायैव। शुद्धसंस्कृते तु 'समाः' इति विशेष्यस्य योगे तस्य संख्या-विशेषणरूपेण स्त्रियां द्वितीयाबहुवचने 'तिस्रः' इत्येव शुद्धः पाठः स्यात्।]

अष्टाविंशति तथा वर्षा पालको भविता नृपः। (मत्स्य०, कोशे)[23]

---

२१. द्र०—पार्जिटर, 'पु० टै०' पृ० ५२, टिप्पण्यः ३३-४२।

२२. पार्जिटर, पु० टै०, पृ० ३२, टि० ३२। Ms. oVā.

२३. Wilson 21, Auf. Cat. No. 95. द्र०-पार्जिटर, पु० टै०, पृ० १६, टि० २६।

['अष्टाविंशति तथा वर्षा (= वर्षाणि)' इति पाठेनात्रानुष्टुप्पादे नवाक्षराणि भवन्ति । प्राकृते तु अस्य स्थाने 'अट्ठावीसं तथा वस्सा' इति पाठो भवति, अनेन प्राकृतपाठेन च पादेऽस्मिन् अष्टाक्षराण्येव भवन्ति । अतो मूलपाठस्तु प्राकृते एव निबद्ध आसीदिति पार्जिटरमहोदयस्य मतम् ।[२४] संवत्सरवाचकस्य 'वर्ष' शब्दस्य 'वर्षा' इति द्वितीयाबहुवचनरूपं तु 'वस्सा' इति प्राकृतरूपस्य प्रतिरूपमेव । पालिभाषायामपि 'फल' प्रभृतीनाम् अकारान्तनपुंसक-शब्दानां प्रथमाद्वितीययोर्बहुवचने 'फला' 'फलानि' इति द्विविधानि रूपाणि भवन्ति । मत्स्यपुराणस्यानन्दाश्रमसंस्करणे (२७२ । ३ उ) अयं पाठः इत्थं संशोधितः प्राप्यते—'अष्टाविंशति वर्षाणि पालको भविता नृपः' । परन्त्वत्रापि 'अष्टाविंशतिं' इति शुद्धपाठस्य स्थाने 'अष्टाविंशति' इत्यपाणिनीयः पाठश् छन्दोऽनुरोधादेव पञ्चमवर्णस्य लघुत्वार्थं स्वीकृतः ।]

अष्टाविंशति मैथिलाः (ब्रह्माण्ड०, ३।७४।१३७ ; वायु०, ९९।३२४)

[अत्रापि 'अष्टाविंशति' इति पाठः प्राकृतानुसारी ; प्राकृते विसर्गस्याभावात् । पञ्चमवर्णस्य लघुत्वकरणायैव अयं पाठोऽत्र गृहीतः ।]

वृद्धवाक्यौषधा नूनं कुर्वन्ति किल निर्विषम् । (वामन०, ५ कोशेषु)[२५]

[अत्रापि 'औषध' इत्यकारान्तनपुंसकशब्दस्य 'औषधा' इति प्रथमा बहुवचनरूपं प्राकृतप्रतिरूपकमेव प्रतीयते ।[२६] लौकिके संस्कृते तु 'औषधानि' इत्येव साधु । अतएव वेंकटेश्वरसंस्करणे (वामन०, ९५।७९ ग) 'वृद्ध-वाक्यौषधान्येव' इति संशोधितः पाठ उपलभ्यते ।]

---

२४. द्र०-पार्जिटर, पु० टै०, पृ० ७८ ।

२५. काशिराजन्यास-पुराणविभागे संवादितेषु पञ्चसु कोशेषु । वामनपुराणस्य संवादितकोशानां विवरणं 'पुराणम्' भाग ३, अङ्क १, पृ० १३५-१३६ स्थले द्रष्टव्यम् ।

२६. पालिभाषायामपि 'फला', फलानि, इत्यादीनि द्विविधानि रूपाणि प्रथमा द्वितीययोर् बहुवचने भवन्ति ; वेदेऽप्येवम्, यथा 'विश्वा', 'विश्वानि', 'या', 'यानि' इत्यादीनि रूपाणि—इति पूर्वमेवोक्तम् । अतोऽत्र 'औषधा', इत्यादीनि रूपाणि आर्ष (वैदिक) प्रयोगाः—इत्यपि वक्तुं शक्यते ।

येहि संस्थाप्यते क्षत्रमैडैक्ष्वाकुकुलं शुभम् । (मत्स्य०, कोशे)[२७]

[अत्र 'येहि' (सं० 'येभिः') इति तृतीयाबहुवचने प्राकृतरूपम् । वेदे इव पालिभाषायां प्राकृते च अकारान्तशब्दस्य तृतीयाबहुवचने भिसन्तं रूपं दृश्यते । लौकिकसंस्कृते तु 'ऐस्'अन्तमेव—इति तु पूर्वमेवोक्तम् । अस्य पाठस्य स्थाने मत्स्यपुराणस्य आनन्दाश्रमसंस्करणे (५०।७४ घ) 'येषु संस्थास्यते तच्च ऐडैक्ष्वाकुकुलं शुभम्' इति पाठ उपलभ्यते ।]

विन्ध्यकानां कुलानान्ते नृपा वैवाहिकास्त्रयः । (ब्रह्माण्ड०, ३।७४।१८६ पू)

[अत्र 'कुलान+अन्ते' इति विच्छेदो युक्तः । 'कुलान' इति 'कुल' शब्दस्य प्राकृते षष्ठी बहुवचनम् ।[२८] यद्यपि ब्रह्माण्डपुराणस्य वेंकटेश्वरसंस्करणे सम्पादकैः 'विन्ध्यकानां कुलानां ते नृपा वैवाहिकास्त्रयः' इति संशोधितः पाठो दृश्यते । परन्तु वायुपुराणेऽत्र 'विन्ध्यकानां कुलेऽतीते नृपा वै वाहिकास्त्रयः' इति पाठो वर्तते । अतो ब्रह्माण्डेऽपि 'कुलानान्ते' (कुलान+अन्ते) तथा 'वै वाहिकाः' (=वाह्लिकाः) इति पाठ एव भवितुमर्हति ।]

(आ) लिङ्गव्यत्ययः

ये चान्ये म्लेच्छजातयः (वायु०, ९९।२६७ ? ; वेंकटे०, २।३७।६६५ ख)

[अत्र 'जातयः' इत्यस्य विशेषणत्वेन 'याश्चान्या' इति शुद्धः पाठो युक्तः । वायुपुराणस्यैके कोशेऽपि[२९] 'याश्चान्या' इति संशोधितः पाठो वर्तते । मत्स्यपुराणस्य आनन्दाश्रमसंस्करणेऽपि 'ये चान्ये म्लेच्छसंभवाः' (५०।७६ घ) इति संशोधितः पाठो विद्यते ।

पुण्यस्य पुण्यतां कुर्वन् पञ्चस्रोताः सरस्वती । (पद्म०, ५।१८।१३९ पू)

[अत्र 'सरस्वती' इत्यस्य विशेषणत्वेन (विधेयत्वेन) कुर्वन्' इति 'शतृ' प्रत्ययान्तं पुंलिङ्गरूपं सर्वथाऽसाधु । अस्य स्थाने 'कुर्वती' इत्येव प्रयोगः

---

२७. मत्स्यपुराणस्य इंडिया-आफिस-पुस्तकालस्थे E. 3535 संख्यके कोशे । द्र०—पार्जिटर, पु० टै०, पृ० २, टि० १६ ।

२८. द्र० – पार्जिटर, पु० टै०, पृ० ७९ ।

२९. पार्जिटर-cVii (Jones Ms., W 6b, T. 38); द्र०—पार्जिटर, पु० टै०, पृ० ३, टि० ३७ ।

साधुः स्यात् । परन्त्वनेन प्रयोगेण छन्दोभङ्गो जायेत । अतः छन्दोऽनुरोधादेव 'कुर्वन्' इति पाठोऽत्र प्रयुक्तः ।]

४. तिङन्तपदसम्बन्धिनोऽपाणिनीयप्रयोगाः

(अ) लङि 'अट्', 'आट्' आगमयोरभावः

कुमारं जनयद् निभुः (मत्स्य०, ९०।४४ ख, कोशेष्वपि)

दाशेयी जनयत् सुतम् (तत्रैव, ५०।४९घ, कोशेष्वपि)

पुत्राणां जनयच्छतम् (तत्रैव, ९०।४७घ, कोशेष्वपि)

[अत्र त्रिष्वपि स्थलेषु छन्दोदोषपरिहाराय 'अजनयत्' इति पाठस्य स्थाने 'जनयत्' इति पाठो वर्तते । शारदाकोशे तदनुसारिणि देवनागरीकोशे च 'पुत्रानजनयच्छतम्' इति संशोधितः पाठो वर्तते ।]

पूर्वं या मालिनी भवत् । (मत्स्य-, ...) ?

[अत्र स्वरविवृत्तिपरिहाराय छन्दोदोषनिवारणाय च 'मालिनी अभवत्' इत्यस्य स्थाने 'मालिनी भवत्' इति पाठो वर्तते । D_0 कोशे तु 'मालिनी अभूत्' इति पाठो विद्यते, D_0 कोशे च 'मालिनी ह्यभूत्' इति स्वरविवृत्तिरहितः पाठो वर्तते ।]

स्तोत्रमुदीरयत् (वामनपुराणस्य प्रायः सर्वेषु कोशेषु)

[अत्र 'आट्' आगमस्याभावः । वेंकटेश्वरसंस्करणे (८५।३१घ) 'आट्'आगमयुतः 'स्तोत्रमुदैरयत्' इति संशोधितः पाठो दृश्यते । अयम् आडागमयुतः पाठोऽपि छन्दोदोषरहित एव । परन्तु वामनपुराणस्य प्रायः सर्वेष्वेव कोशेषु (शारदकोशेऽपि) छन्दोदोषप्रसङ्गमन्तरेणापि 'उदीरयत्' इत्येव पाठः प्राप्यते । अत एवायमेव प्राचीनः पाठः ।]

(आ) आत्मनेपदस्य स्थाने परस्मैपदम्

(१) कर्तृवाच्ये—

ते धुन्धुवाक्यं तु निशम्य दैत्याः
प्रोचुर्ननो विद्यति लोकपालः । (वामन०, ७८।२० पू०)

[अत्र 'इन्द्रवज्रा' वृत्तस्य प्रथमौ द्वौ पादौ 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इति लक्षणानुसारेण वृत्तस्यास्य सप्तमम् अक्षरं (जगणस्य प्रथमम् अक्षरं) लघु भवति। अतएवात्र छन्दोऽनुरोधेन 'विद्यते' इत्यस्य स्थाने 'विद्यति' इत्यपाणिनीयः पाठः सप्तमाक्षरस्य लघुत्वकरणाय समाश्रितः।]

(२) कर्मवाच्ये—

या च सदा दिवि सेव्यति देवैर्
या च सदा भुवि सेव्यति विप्रैः।

(मत्स्य० कोशेषु)

[आनन्दाश्रममुद्रितमत्स्यपुराणस्य ११६।२२उ स्थाने S_1, D_1, D_2, D_8, कोशेष्वयं पाठ उपलभ्यते। अत्र एकादशाक्षरात्मकौ दोधकवृत्तपादौ। दोधकवृत्तस्य च वृत्तरत्नाकरे—'दोधकवृत्तमिदं भमभाद् गौ' इति लक्षणम्। दोधकवृत्तस्य पादे नवमम् अक्षरं लघु भवति भगणस्य तृतीयाक्षरत्वात्। अतः, छन्दोऽनुरोधाद् अत्र दोधकवृत्तस्योभयोरपि पादयोः 'सेव्यते' इति शुद्धपाठस्य स्थाने कर्मवाच्येऽपि 'सेव्यति' इत्यपाणिनीयः पाठो वर्तते, नवमाक्षरस्य लघुत्वकरणाय।]

चिह्नं भवव्रतानां दृश्यति चेह जन्मनि प्रकटम्। (मत्स्य०, १९३।३९उ)

[अत्र 'आर्या' छन्दसः तृतीयचतुर्थपादौ। आर्यायास् तृतीये पादे द्वादश मात्रा भवन्ति। चतुर्थपादे च पञ्चदशमात्राः। इदं लक्षणमनुसृत्यात्र चतुर्थे पादे 'दृश्यते' इति शुद्धपाठस्य स्थाने कर्मण्यपि 'दृश्यति' इति पाठः प्रयुक्तः।]

५. 'क्त्वा'ऽन्तसम्बन्धिनोऽपाणिनीयप्रयोगाः

(अ) समासेऽपि 'क्त्वा' प्रत्ययस्य 'ल्यप्' आदेशाभावः

['समासेऽनञ्पूर्वे क्त्वो ल्यप्' (पा० ७।१।३७) इति सूत्रे भगवता पाणिनिना भाषायाम् (लौकिकसंस्कृते) उपसर्गपूर्वकाद् धातोः 'क्त्वा' प्रत्ययस्य नित्यं 'ल्यप्'(य) आदेशो विहितः। परन्तु पुराणेषु क्वचिद् उपसर्गपूर्वकाद् धातोरपि 'ल्यप्' स्थाने 'क्त्वा' एव दृश्यते। तत्र प्रायेण छन्दोऽनुरोध एव हेतुर्

भवितुमर्हति । प्राकृतप्रभावोऽपि तत्र हेतुरनुमीयते, पालिप्राकृते तादृशानां प्रयोगानां सद्भावात् । अथवा, वैदिकप्रयोगप्रतिरूपकास् तादृशाः प्रयोगाः पुराणेषु वर्तन्ते—इत्यपि वक्तुं सुकरम् । तथापि, पुराणेषु विद्यमाना ल्यबादेश-रहिता एते प्रयोगा अपाणिनीया एव, यतः पाणिनिना छन्दस्येव समासेऽपि क्त्वो बाहुल्येन ल्यबादेशाभाव उक्तः, न तु भाषायामिति पूर्वमेव प्रस्तावनायां स्पष्टीकृतम् ।]

उदाहरणानि

(१) प्रवर्त्तयित्वा तं सर्वमृषिं बाजसनेयकम् ।
(मत्स्य०, ५०।६४ पू, वायु०, ६६।···)

(२) प्रोक्त्वेत्थं वचनं विभो । (वामन०, ६३।७)
प्रोक्त्वेत्थं च सरस्वती (वामन०, ८६।६४)
ॐ नमः शंकरायेति प्रोक्त्वा जग्मुर्हिमालयम् । (वामन०, ५।१२ पू)

(३) शशिप्रभं देववरं त्रिनेत्रं संपूजयित्वा सहितं मृडान्या ।
(वामन०, ८४।४१)

(४) आमन्त्रयित्वा यो मोहादन्यं चा०··· । (कूर्म०, २।२२।८)

(५) सर्वं बलं प्रेषयित्वा गङ्गातीरेऽग्निमाविशत् । (ब्रह्म०, १३८।५५ पू)

(६) उत्सादयित्वा क्षत्रं तु क्षत्रमन्यत्करिष्यति । (वायु०, ६६।३८०)

[वायुपुराणे अत्रैव प्रकरणेऽन्यत्र (९९।३७७) 'उत्साद्य पार्थिवान् सर्वान्' इत्यत्र 'उत्साद्य' इति साधुः पाठ एव दत्तः, न तु 'उत्सादयित्वा' इत्यपाणिनीयः पाठः, तत्र छन्दोदोषप्रसङ्गाभावात् । 'उत्सादयित्वा' इति पाठे प्राकृत-प्रभावोऽपि लक्ष्यते । अत एव वायुपुराणस्यैके कोशे (पार्जिटर—eVā) अस्य स्थाने 'उच्चादयित्वा' इति प्राकृतरूपमेव लिखितमुपलभ्यते ।[३०] विष्णुपुराणेऽत्रैव 'उत्साद्याखिलक्षत्रजातिम्' इति शुद्धः पाठ एव वर्तते (४।२४।६३) ।]

(आ) असमासेऽपि 'क्त्वा' प्रत्ययस्य 'ल्यप्' आदेशः

[लौकिकसंस्कृते 'क्त्वा' प्रत्ययस्य 'ल्यप्' आदेशस्तु अनव्पूर्वे समासे

३०. द्र०—पार्जिटर, पु० टै०, पृ० ५३, टि० ५२ । (eVā = Jones MS.; W 6 b, T 38.)

(उपसर्गपूर्वकाद् धातोः) एव भवति। परन्तु पुराणेषु प्राय उपसर्गरहिताद् धातोरपि 'क्त्वा' प्रत्ययस्य ल्यबादेशो दृश्यते। अत्रापि छन्दोऽनुरोध एव मुख्यो हेतुः। प्राकृतप्रभावो वैदिकप्रयोगानुसरणं वाऽपि हेत्वन्तरम् अनुमातुं शक्यते परं तत्तु गौणमेव।

उदाहरणानि

(१) ततः शुक्लाम्बरैः शूर्पं वेष्ट्य संपूजयेत्फलैः। (मत्स्य०, ८१।१८ पू)
" " " वेष्टयित्वार्चयेत्फलैः। (D $_{1}$, D $_{13}$)

(२) तदोंकारमयं गृह्य प्रतोदं···। (मत्स्य०, १३३।२७ ; कोशेषु च)
तत्रोंकारं च संगृह्य प्रतोदं···। (Ś —शारदालिपिकोशे)

(३) शिरसा तु ततो वन्द्य मातरं···। (मत्स्य०, १५८।१० पू, कोशेषु च)

(४) पूज्य देवं चतुर्मुखः। (वामन०, ४९।३७)
पूजयित्वा सरस्वतीम्। (तत्रैव, ४०।४)
संपूज्य देववेशं। (तत्रैव, ६३।७६)

(५) तत्रोष्य सुचिरं कालं (वामन०, ७९।८६)
उपोष्य ··· ··· ··· (तत्रैव, ८०।३५)
उषित्वा ··· ··· ··· (मत्स्य०, १८६।३३)

(६) सेव्य पांशुं प्रयत्नेन (वामन०, ४५।२२)

(७) तत्र स्थाप्य हरिर्देवीं (वामन०, ५४।२८)

[एषु उदाहरणेषु 'वेष्ट्य', 'गृह्य', 'वन्द्य', पूज्य', 'उष्य', 'सेव्य' 'स्थाप्य' इति पदानि छन्दोऽनुरोधादेव प्रयुक्तानि। यत्र तु छन्दोभङ्गभीतिर् न विद्यते तत्र 'पूजयित्वा', 'संपूज्य', 'उपोष्य', 'उषित्वा' इत्यादीनि पदान्येव प्रयुक्तानि। 'वेष्ट्य' 'गृह्य' इत्यत्र च कोशेषु 'वेष्टयित्वा', 'संगृह्य' इति संशोधनमपि विद्यते।]

(८) संतोष्य नारायणमर्च्य भक्त्या (वामन, ७९।५)
तमर्चयित्वा विश्वेशं (तत्रैव, ८४।३६)

[पूर्ववद् अत्रापि 'अर्च्य' इत्यपाणिनीयः प्रयोगश् छन्दोऽनुरोधाद् एव। यत्र च तादृश्यपेक्षा न विद्यते तत्र 'अर्चयित्वा' इति साधुरेव प्रयोगो वर्तते। पुनश्च, वामनपुराणस्य वेंकटेश्वरसंस्करणे ८४।३२ श्लोके 'तमार्च्य' इति संशोधितः प्रयोगो वर्तते, परन्तु सर्वेषु कोशेष्वत्र 'तमर्च्य' इत्येव पाठो वर्तते। अतो ज्ञायते मूलपाठस्तु 'अर्च्य' इत्येवासीत्, वेंकटेश्वरसम्पादकैश्च तस्य 'आर्च्य' इति निराधारमेव संशोधनं कृतम्।]

पुराणेषु प्रयुक्तानाम् अपाणिनीयप्रयोगानाम् एतावता विमर्शेन स्पष्टमिदं प्रतीयते यद् एतादृशानां प्रयोगानां सद्भावे तु छन्दोऽनुरोध एव प्रधानो हेतुः; पुराणेषु प्रायः पद्यभागेष्वेव अपाणिनीयप्रयोगा वर्तन्ते, गद्यभागेषु तु तेषां स्थाने पाणिनीयप्रयोगा एव प्रयुक्ताः, यथा 'उत्सादयित्वा क्षत्रं तु' (वायु०, ३।३८०) इति पद्ये प्रयुक्तस्य 'उत्सादयित्वा' पदस्य स्थाने 'उत्साद्याखिलक्षत्रजातिम्' (विष्णु० ४।२४।६३) इति गद्यांशे 'उत्साद्य' इति पाणिनीयः प्रयोग एव वर्तते। केषुचित् प्रयोगेषु च प्राकृतभाषायाः प्रभावोऽपि स्पष्ट एव। बहूनाम् अपाणिनीयप्रयोगानां संशोधने च लिपिकारैः संपादकैश्च यः प्रयत्नः कृतः, तेनैतेषां प्रयोगानाम् आर्षत्वं बाधितं भवति; यतः, असाधूनामेव प्रयोगानां संशोधनं क्रियते, न त्वार्षाणाम्। अतः संशोधकानां विचारेष्वपि तेऽपाणिनीयप्रयोगाः असाधव एवासन् न त्वार्षाः।